International Journal of Sanskrit Research 2022; 8(6): 161-162

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(6): 161-162
© 2022 IJSR
www.anantaajournal.com
Received: 15-09-2022
Accepted: 21-10-2022

**SP Tejaswi**
Reasearch scholar, Advaita vedantam Rashtriya Sanskrit vidyapeeth, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**SP Tejaswi**
Reasearch scholar, Advaita vedantam Rashtriya Sanskrit vidyapeeth, National Sanskrit University, Tirupati, Andhra Pradesh, India

# सिद्धान्तपञ्चकानुसारेण आनन्दमयाधिकरण विचारः।

**SP Tejaswi**

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i6c.1928

**प्रस्तावना:**

पुरुषेण अर्थ्यतेऽति पुरुषार्थः। चत्वारः पुरुषार्थाः यथा धर्मः, अर्थः, कामः, मोक्षः इति। एतेषु चतुर्विध पुरुषार्थेषु मोक्षः एव परमपुरुषार्थः, नित्यत्वात्। "न स पुनरावर्तते" इति श्रुत्या, परिशिष्टानां तु अनित्यत्वात् न परमपुरुषार्थता। स च मोक्षः कीदृशः? केन साधनेन आप्तुं शक्यः? इत्यादि विचिकित्साः दूरीकरणाय मोक्षसाधनविचारे मतभेदाः विद्यन्ते। ते एव दर्शनाख्याः यथा चार्वाक–बौद्ध–जैन-नैय्यायिक-सांख्य-मीमांसकाः। एतेषु श्रुतिस्मृतिसम्मततया आनन्दस्वरूपविचारः अद्वैतदर्शने प्रस्थानत्रयेण प्रपञ्चितः। सः विचारः सामान्यतया चित पञ्चकसिद्धान्तानुसारेण शोधपत्रेऽस्मिन् विचार्यत।

भगवताबादरायणाचार्येण विरचित ब्रह्मसूत्रग्रन्थः शारीरकमीमांसारूपेण ख्यातः। उपनिषन्मन्त्राणां अर्थः प्रतिपादितः। एतानि सूत्राणि गूढार्थप्रतिपादकानि। तथैव जीवस्य स्वरूपमपि स्पष्टं प्रतिपादयन्ति यद् च जीवस्य मुख्यलक्ष्यम्।

अद्वैतवेदान्तानुसारेण ब्रह्मसूत्राणां संख्या 555। एतानि सूत्राणि भागचतुष्टये विभक्तानि यानि अध्यायरूपेण ख्यातानि। प्रत्येकोऽपि अध्यायः पादचतुष्टययुक्तः। पादेषु सूत्राणि अधिकरणरूपेण विभक्तानि। अधिकरणञ्च सूत्राणां सङ्ग्रहणम्। अधिकरणेषु वादप्रतिवादपुरस्सरम् उपनिषदः विषयं प्रतिपादयन्ति।

प्रथमाध्यायः समन्वयाध्यायः। गुणातीतात्मनः स्वरूपं अध्यायेऽस्मिन् प्रत्यपादयत्। तथैव अस्मिन् अध्याये प्रथमपादे स्पष्टब्रह्मलिङ्गश्रुतिविषये अवोचत्।

प्रथमाध्यायस्य प्रथमपादे एकादश अधिकरणानि सन्ति। उपोद्घातरूपेण प्रथमाधिकरणचतुष्टये उक्त्वा, अनन्तराधिकरणेषु अस्य विस्तृतविवरणं प्रदत्तम्। प्रथमाधिकरण चतुष्टयं "चतुस्सूत्रीत्वेन" स्वीक्रियते।

पञ्चमाधिकरणेषु अस्य विस्तृतविवरणं प्रदत्तम्। प्रथमाधिकरण चतुष्टयं चतुस्सूत्रीत्वेन स्वीक्रियते। पञ्चमाधिकरणं ईक्षत्यधिकरणं यच्च सांख्य योगस्य विमर्शनात्मकम्। षष्ठाधिकरणं अतिमुख्यम् आनन्दमयाधिकरणम्। अस्मिन् अधिकरणे "ब्रह्म पुच्छं प्रतिष्ठा" इति तैत्तिरीयोपनिषद् वाक्यं स्वीकृत्य जीवब्रह्मणोर्विषयः प्रस्तुतः। तत्र जीवः आनन्दमयः इति ब्रह्म च आनन्दः अथवा पुच्छम् इति प्रतिपादितम्।

मध्वाचार्याणां द्वैतभाष्यानुसारेण षष्ठाधिकरणे आनन्दमयकोशस्य विस्तृतं विवरणं दत्तम्। अत्र आनन्दमयश्शब्दः ब्रह्माणं/विष्णुं/चतुर्मुख ब्रह्माणं/रुद्रं/जीवं/प्रकृतिं द्योतयति इति। पश्चात् पूर्वपक्षी इत्थम् आक्षिपति आनन्दमयश्शब्दः केवलं ब्रह्मपरः। अन्ततो गत्वा आनन्दमयश्शब्दः केवलमानन्दद्योतकः इति सिद्धान्तयति।

रामानुजाचार्य- श्रीभाष्ये तैत्तिरीयोपनिषद् वाक्यमित्थं उपस्थापितं यत् आनन्दमयश्शब्दः परमात्मा न तु विज्ञमयः न च जीवः। एवञ्च श्रीभाष्ये उक्तं चेतनाचेतने परमात्मनः शरीरमिति। तदित्थं जीवः शारीरकपरमात्मनः शरीरम्/स्वरूपम्। ब्रह्मसूत्राणि शारीरकानि इति।

निम्बार्काचार्यः भेदाऽभेदः अथवा द्वैताद्वैतमतं मनुते। एतेषां मते ब्रह्मजीवजगताम् सत्यत्वं वर्तते। आनन्दमयश्शब्दः परमात्मपरः एव न तु जीवात्मपरः।

शुद्धाद्वैतवेदान्त प्रवर्तकः वल्लभाचार्यः इत्थं प्रतिपादी आनन्दमयश्शब्दः परमात्मैव बोधयति न जीवं न च प्रपञ्चं। जीवः आनन्दमयः स्वरूपः। तदित्थं सिद्धान्तः आनन्दमयश्शब्दः ब्रह्माणमेव बोधयति।

तैत्तिरीयोपनिषदि पञ्चकोशानां विस्तृतं विवरणम् अस्ति। अत्र कोशपञ्चके ब्रह्मणः स्वरूपं यद्यपि प्रतिपादितं तथापि आनन्दमयकोशोक्त ब्रह्मणः स्वरूपमेव निरवद्यम् इति सर्वमत सिद्धान्ताध्यायनानन्तरम् अद्वैतवेदान्तप्रवर्तकानां शङ्करभगवत्पादानां सिद्धान्तः। इत्थं ब्रह्मणः "ब्रह्म पुच्छं प्रतिष्ठा" इति स्वरूपसिद्धान्तः श्रुतिस्मृति सम्मतः। अस्य मते जीवः आनन्दस्वरूपीअविद्याऽवृतः।अविद्यानिवृत्तौ/तत्त्वज्ञाने ब्रह्मस्वरूपं प्राप्नोति। ब्रह्मवित् च भवति।

## सहायकग्रन्थ सूची


1. ईशादि नौ उपनिषद् गीताप्रेस, गोरखपूर्।
2. ब्रह्मसूत्र शङ्करभाष्यम्, श्रीशङ्करभगवत्पादाचार्याः- राष्ट्रिय संस्कृतसंस्थान्
3. रामानुजाचार्य श्रीभाष्यम्।
4. मध्वाचार्य ब्रह्मसूत्रभाष्यम्।
5. निम्बार्काचार्य ब्रह्मसूत्रभाष्यम्।
6. वल्लभाचार्य अणुभाष्यम्।